**Q.P. Code :06006**

**[Time: - 3 Hours]** **[ Marks: 100]**

Please check whether you have got the right question paper.

N.B:
1. All Questions are **compulsory**.
2. All Questions carry **equal** marks.
3. Figures to the **right** indicate **marks** to a **subquestions**.

१. केवलं **द्वौ समूहौ** अनुवदत। १०

A. (i) लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।

(ii) कस्मिंश्चिदधिष्ठाने उध्दतो नाम गर्दभः प्रतिवसति स्म। स सदैव रजकगृहे भारोद्वहनं कृत्वा रात्रौ स्वेच्छया पर्यटति। ततः प्रत्यूषे बन्धनभयात् स्वयमेव रजकगृहमायाति। रजकोऽपि ततस्तं बन्धनेन नियुनक्ति। अथ तस्य रात्रौ क्षेत्राणि पर्यटतः कदाचित् शृगालेन सह मैत्री संजाता। स च पीवरत्वाद् वृत्तिभङ्गं कृत्वा कर्कटिकाक्षेत्रे शृगालसहितः प्रविशति।

B. (i) तथाऽनष्ठिते तैर्मार्गाश्रितैरटव्यां कतिचिदस्थीनि दृष्टानि। ततश्चैकेनाभिहितम्- ''अहो, अद्य विद्याप्रत्ययः क्रियते। किंचिदेतत् सत्त्वं मृतं तिष्ठति। तद् विद्याप्रभावेण जीवनसहितं कुर्मः। अहमस्थिसंचयं करोमि।'' ततश्च तेनौत्सुक्याद् अस्थिसंचयः कृतः। द्वितीयेन चर्ममांसरुधिरं संयोजितम्। १०

(ii) भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिः भूरिविलम्बिनो घनाः।
अनुध्दताः सत्पुरुषाः समृध्दिभिः
स्वभाव एवैष परोपकारिणाम्।।

C. (i) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु १०
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।

(ii) अथ कदाचित् रात्रौ सुप्तः चिन्तयामास-यत् परिपूर्णोऽयं घटस्तावत् सक्तुभिर्वर्तते। तद्यदि दुर्भिक्षं भवति, तदनेन रुप्यकाणां शतम् उत्पत्स्यते। ततस्तेन मयाऽजाद्वयं ग्रहीतव्यम् ततः षाण्मासिकम् आप्रसववशात् ताभ्यां यूथं भविष्यति। ततोऽजाभिः प्रभूता गा ग्रहिष्यामि।

**TURN OVER**

BFE4162D582636FA14E8A96D4E20F6F7

२. केवल **द्वौ परिच्छेदौ** अनुवदत–
- A. जीर्णधनस्य चातुर्यम्। १०
- B. ब्राह्मणीनकुलकथासारांशः। १०
- C. विद्यामाहात्म्यम्। १०

३. ससन्दर्भं स्पष्टीकुरुत (केवलं **द्वे**)
- A. मणिनालंकृतः सर्पः किमसौ न भयङ्करः। १०
- B. न खलु वयस्तेजसो हेतुः। १०
- C. पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः। १०

४. केवलं **व्दौ** उत्तरत। १०
- A. 'भर्तृहरेः कालः, जीवनं तथा साहित्यम्' निबन्धं लिखत।
- B. लोहतुला-वणिक्पुत्र-कथां विस्तरेण स्पष्टीकुरुत।
- C. 'पञ्चतन्त्रस्य रचना तथा महत्त्वम्' - निबन्धं लिखत।

५. टिप्पणीं लिखत। (केवलं **द्वे**)

A. (i) मनुष्यरुपः पशुः। १०
(ii) अधमः पुरुषः।

B. (i) वित्तस्य गतयः। १०
(ii) नकुलः।

C. (i) महतां चित्तम्। १०
(ii) दिवास्वप्नम्।

D. (i) वाग्भूषणं भूषणम्। १०
(ii) मूर्खस्वभावः।

---------------